SANGCOR03T

Section-B অভিজ্ঞানশকুন্তলম্

Explain in Sanskrit

1. अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥ 4.22

উৎস: :- মহাকবেঃ কালিদাসস্য সর্বশ্রেষ্ঠ স্বরূপম্ অপূর্বং নাটকং অভিজ্ঞানশকুন্তলম্ নাম। তত্র চতুর্থে অঙ্কে সমুপলভ্যতে অয়ং শ্লোকঃ।

প্রসঙ্গঃ :- শকুন্তলাং পতিগৃহং সংপ্রেষ্য মহর্ষেঃ কণ্বস্য কীদৃশঃ মনোভাবঃ জাতঃ তদ্ বর্ণনাপ্রসঙ্গেন শ্লোকোঽয়ম্ উক্তঃ — অর্থো হি ইতি।

অন্বয়ঃ :- কন্যা হি পরকীয়ঃ এব অর্থঃ। অদ্য তাং পরিগ্রহীতুঃ সংপ্রেষ্য মম অয়ম্ অন্তরাত্মা, প্রত্যর্পিত-ন্যাস ইব প্রকামং বিশদঃ জাতঃ।

ব্যাখ্যা :- শকুন্তলায়াঃ আশ্রমাৎ গমনাৎ অনন্তরং সর্বে বিষাদগ্রস্তাঃ অপি মহর্ষিঃ কণ্বঃ অন্যবিলক্ষণভাবেন অবস্থিতঃ। স আত্মভাবং বর্ণয়তি — কন্যা পরস্য অয়ম্ পরকীয়ঃ অন্যস্বামিকঃ এব ইতি নিশ্চয়ম্। অর্থঃ ধনম্, যাবৎ কন্যা পিতৃগৃহে তিষ্ঠতি, তাবৎ পিতা তাং ন্যস্তং ধনমিব সযত্নং রক্ষতি। অতঃ অবশ্য-সম্প্রদানীয়ত্বেন কন্যাসাধারণস্য পরকীয়ত্বম্ উক্তম্। তাং তাদৃশীং পরিণীতবতে কন্যাং শকুন্তলাম্ অদ্য পরিগ্রহীতুঃ স্বামিনঃ দুষ্যন্তস্য সমীপং সংপ্রেষ্য প্রেরয়িত্বা মম কণ্বস্য অয়ম্ অন্তরাত্মা চিত্তং প্রত্যর্পিতন্যাসঃ পুনরর্পিতন্যাসঃ নিক্ষেপঃ, ন্যস্তং ধনমিতি ভাবঃ যেন তাদৃশঃ এব। প্রকামম্ অত্যন্তং

বিশদঃ বিমলঃ চিন্তামুক্তঃ ইতি ভাবঃ ।

প্রাচীন-ভারতীয়-প্রথানুসারেণ ন কোঽপি পিতা কন্যাং স্বগৃহে চিরং পালয়িতুম্ অর্হতি । প্রযত্নেন যত্নেন বর্ধিতাপি বয়ঃপ্রাপ্তাং কন্যাং সৎপাত্রায় তস্মা এব সম্প্রদীয়তে । অতএব কন্যা পিতুঃ সমীপং তস্যাঃ স্বামিনঃ গচ্ছিতধনমিব । অন্যেন ন্যস্তং ধনং যথা তস্করাদিভ্যঃ সযত্নং রক্ষতি জনঃ তদ্বৎ কন্যামপি সর্বপ্রকারেণ রক্ষতি পিতা । গচ্ছিত-ধনং ধনস্বামিনে প্রত্যর্প্য যথা কোঽপি ভারমুক্তো ভবতি, তদ্রূপম্ পিতা অপি স্বামিনঃ হস্তে কন্যাং সমর্প্য চিন্তামুক্তঃ জায়তে ।

অস্মিন্ শ্লোকে চিরন্তন-পিতৃহৃদয়স্য কাতরঃ ভাবঃ বর্ণিতঃ । অস্য শ্লোকস্য মানবিকম্ আবেদনমপি শাশ্বতম্ । অত্র উৎপ্রেক্ষালংকারঃ । ইন্দ্রবজ্রাবৃত্তম্ । তস্য লক্ষণম্ – 'স্যাদিন্দ্রবজ্রা যদি তৌ জগৌ গঃ' ইতি ।

---

२. यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥

4.6

উৎস: :- মহাকবিকালিদাসকৃতস্য 'অভিজ্ঞানশকুন্তলম্' নাম নাটকস্য চতুর্থে অঙ্কে লভ্যতে অয়ং শ্লোকঃ।

প্রসঙ্গ: :- শকুন্তলায়াঃ পতিগৃহযাত্রাকালে মহর্ষিঃ কণ্বঃ তস্য পালিতকন্যায়াঃ শকুন্তলায়াঃ কৃতে স্বশোকং প্রকাশয়ন্নাহ অস্মিন্ শ্লোকে।

ব্যাখ্যা:- অদ্য অস্মিন্ অহনি শকুন্তলা পতিগৃহং যাস্যতি ইতি হেতোঃ মম হৃদয়ম্ উৎকণ্ঠয়া দুঃখেন সংস্পৃষ্টং সম্যগ্ অভিভূতম্। কণ্ঠঃ স্বরঃ স্তম্ভিতঃ অবরুদ্ধা যা বাষ্পস্য নেত্রজলস্য বৃত্তিঃ প্রবৃত্তিঃ তয়া কলুষঃ বিকৃতঃ স্বরভঙ্গবান্ কণ্ঠ ইত্যর্থঃ। দর্শনং তচ্চ ইন্দ্রিয়বৃত্তিহীনং শকুন্তলায়াঃ গমনরূপচিন্তয়া জড়ং স্বস্ববিষয়গ্রহণে অসমর্থম্। তেনাহং নয়নাভ্যাং দ্রষ্টুং কর্ণাভ্যাং শ্রোতুং ন সমর্থঃ ইত্যর্থঃ। অরণ্যৌকসঃ বনবাসিনঃ মম তাবৎ ঈদৃশম্ এবং বিধং গুরুতরং বৈক্লব্যং বিয়োগবৈধুর্য্যং যদি, গৃহিণঃ সংসারিণঃ নরাঃ প্রথমোপলব্ধৈঃ কন্যকাবিচ্ছেদদুঃখৈঃ কথং নু পীড্যন্তে ব্যাকুলীক্রিয়ন্তে।

অনপত্যস্য অরণ্যকস্য মম কৃতকতনয়া বিশ্লেষেণ এবং দুঃখং যদি, অন্যে তেষাং সমধিকতরং গৃহস্থানাং স্বাঙ্গজাতানাং কন্যানাং বিয়োগবৈধুর্য্যং নিতরাং দুর্বহ-মিতি সরলার্থঃ।

---

৩.

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥ ४/१ ।

উৎসঃ :- মহাকবিকালিদাসকৃতস্য 'অভিজ্ঞানশকুন্তলম্' নাম নাটকস্য চতুর্থে অংকে সমুপলভ্যতে ।

প্রসঙ্গঃ :- গান্ধর্বেন বিবাহবিধিনা শকুন্তলামুদ্বাহ্য স্বনগরং প্রস্থিতে রাজনি দুষ্যন্তে, শকুন্তলায়াং তচ্চিন্তা-পরায়ণায়াং কদাচিৎ তত্রাগতো সুলভকোপঃ মহর্ষিঃ দুর্বাসা । দুষ্যন্তগতচিত্তা শকুন্তলা কথমপি তদাগমনং ন জ্ঞাতবতীতি তদাতিথ্যং নৈব চকার ।

ব্যাখ্যা:- আত্মপরিভবং ক্রুদ্ধা দুর্বাসা তং শশাপ,- অনন্যমানসা একাগ্রচিত্তেন যং প্রিয়ং বিচিন্তয়ন্তী বিশেষেণ ভাবয়ন্তী সতী তপোনিধিং তপস্যাসমৃদ্ধং, (অনেন আত্মনো মহত্ত্বম্ অনাদরে দোষাধিক্যং চ ব্যজ্যতে) মাম্ দুর্বাসসম্ উপস্থিতং প্রেক্ষ্য আশ্রমে আগতমপি ন বেৎসি নানুভবসি ন সৎকরোষি ইতি ভাবঃ, স তব চিত্তাপহারকঃ দুষ্যন্তঃ প্রমত্তঃ প্রকর্ষেণ উন্মত্তঃ প্রথমম্ উন্মাদাবস্থায়াঃ পূর্বে কৃতাম্ উচ্চারিতাং, কথামিব বোধিতোঽপি বচনৈঃ স্মারিতোঽপি সন্ ত্বাং ন স্মরিষ্যতি, পত্নীত্বেন ন জ্ঞাস্যতি ইতি ভাবঃ ।

যথা কশ্চিৎ প্রমত্তঃ জনঃ তস্য পূর্বোচ্চারিতং বচনং ন পরক্ষণং স্মরতি তথা দুষ্যন্তোঽপি শকুন্তলাং ন স্মরিষ্যতি ইত্যুপমালংকারঃ । তথা উত্তরার্ধং প্রতি পূর্বার্ধস্য হেতুত্বাৎ কাব্যলিঙ্গম্ । বংশস্থবিলং চ বৃত্তম্ ।

---

Scanned by CamScanner